# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (तृतीय अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ अथ श्रीदुर्गासप्तशती ॥

॥ अथ तृतीयोऽध्यायः ॥

। ध्यानम् ।

ॐ उद्यद्भानुसहस्रकान्तिमरुणक्षौमां(म्) शिरोमालिकां(म्),
रक्तालिप्तपयोधरां(ञ्) जपवटीं(वँ) विद्यामभीतिं(वँ) वरम् ।
हस्ताब्जैर्दधतीं(न्) त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं(न्),
देवीं(म्) बद्धहिमां(म्)शुरत्नमुकुटां(वँ) वन्देऽरविन्दस्थिताम् ।

ॐ ऋषिरुवाच ॥ 1॥

निहन्यमानं(न्) तत्सैन्य- मवलोक्य महासुरः ।
सेनानीश्चिक्षुरः(ख्) कोपा- द्ययौ योद्‌धुमथाम्बिकाम् ॥ 2॥

स देवीं(म्) शरवर्षेण, ववर्ष समरेऽसुरः ।
यथा मेरुगिरेः(श्) शृङ्गं(न्), तोयवर्षेण तोयदः ॥ 3॥

तस्यच्छित्वा ततो देवी, लीलयैव शरोत्करान् ।
जघान तुरगान् बाणैर्- यन्तारं(ञ्) चैव वाजिनाम् ॥ 4॥

चिच्छेद च धनुः(स्) सद्यो, ध्वजं(ञ्) चातिसमुच्छ्रितम् ।
विव्याध चैव गात्रेषु , छिन्नधन्वानमाशुगैः ॥ 5॥

सच्छिन्नधन्वा विरथो, हताश्वो हतसारथिः ।
अभ्यधावत तां(न्) देवीं(ङ्), खड्गचर्मधरोऽसुरः ॥ 6॥

सिं(म्)हमाहत्य खड्गेन, तीक्ष्णधारेण मूर्धनि ।
आजघान भुजे सव्ये, देवीमप्यतिवेगवान् ॥ 7॥

तस्याः(ख्) खड्गो भुजं(म्) प्राप्य, पफाल नृपनन्दन ।
ततो जग्राह शूलं(म्) स, कोपादरुणलोचनः ॥ 8॥

चिक्षेप च ततस्तत्तु, भद्रकाल्यां(म्) महासुरः ।
जाज्वल्यमानं(न्) तेजोभी, रविबिम्बमिवाम्बरात् ॥ 9॥

दृष्ट्वा तदापतच्छूलं(न्), देवी शूलममुञ्चत ।
तच्छूलं शतधा तेन , नीतं(म्) स च महासुरः ॥ 10॥

हते तस्मिन्महावीर्ये, महिषस्य चमूपतौ ।
आजगाम गजारूढश् - चामरस्त्रिदशार्दनः ॥ 11॥

सोऽपि शक्तिं(म्) मुमोचाथ, देव्यास्तामम्बिका द्रुतम् ।
हुङ्काराभिहतां(म्) भूमौ, पातयामास निष्प्रभाम् ॥ 12॥

भग्नां(म्) शक्तिं(न्) निपतितां(न्), दृष्ट्वा क्रोधसमन्वितः ।
चिक्षेप चामरः(श्) शूलं(म्), बाणैस्तदपि साच्छिनत् ॥ 13॥

ततः(स्) सिं(म्)हः(स्) समुत्पत्य, गजकुम्भान्तरे स्थितः ।
बाहुयुद्धेन युयुधे, तेनोच्चैस्त्रिदशारिणा ॥ 14॥

युद्ध्यमानौ ततस्तौ तु, तस्मान्नागान्महीं(ङ्) गतौ ।
युयुधातेऽतिसं(म्)रब्धौ, प्रहारैरतिदारुणैः ॥ 15॥

ततो वेगात् खमुत्पत्य, निपत्य च मृगारिणा ।
करप्रहारेण शिरश्- चामरस्य पृथक्कृतम् ॥ 16॥

उदग्रश्च रणे देव्या, शिलावृक्षादिभिर्हतः ।
दन्तमुष्टितलैश्चैव, करालश्च निपातितः ॥ 17॥

देवी क्रुद्धा गदापातैश्- चूर्णयामास चोद्धतम् ।
वाष्कलं(म्) भिन्दिपालेन, बाणैस्ताम्रं(न्) तथान्धकम् ॥ 18॥

उग्रास्यमुग्रवीर्यं(ञ्) च, तथैव च महाहनुम् ।
त्रिनेत्रा च त्रिशूलेन, जघान परमेश्वरी ॥ 19॥

बिडालस्यासिना कायात् - पातयामास वै शिरः ।
दुर्धरं(न्) दुर्मुखं(ञ्) चोभौ, शरैर्निन्ये यमक्षयम् ॥ 20॥

एवं(म्) सङ्क्षीयमाणे तु, स्वसैन्ये महिषासुरः ।
माहिषेण स्वरूपेण, त्रासयामास तान् गणान् ॥ 21॥

कां(म्)श्चित्तुण्डप्रहारेण, खुरक्षेपैस्तथापरान् ।
लाङ्गूलताडितां(म्)श्चान्याञ्- छृङ्गाभ्यां(ञ्) च विदारितान् ॥ 22॥

वेगेन कां(म्)श्चिदपरान् - नादेन भ्रमणेन च ।
निःश्वासपवनेनान्यान्, पातयामास भूतले ॥ 23॥

निपात्य प्रमथानीक- मभ्यधावत सोऽसुरः ।
सिंहं(म्) हन्तुं(म्) महादेव्याः(ख्), कोपं(ञ्) चक्रे ततोऽम्बिका ॥ 24॥

सोऽपि कोपान्महावीर्यः(ख्), खुरक्षुण्णमहीतलः ।
शृङ्गाभ्यां(म्) पर्वतानुच्चां(म्)श्- चिक्षेप च ननाद च ॥ 25॥

वेगभ्रमणविक्षुण्णा, मही तस्य व्यशीर्यत ।
लाङ्गूलेनाहतश्चाब्धिः(फ्), प्लावयामास सर्वतः ॥ 26॥

धुतशृङ्गविभिन्नाश्च, खण्डं(ङ्) खण्डं(यँ) ययुर्घनाः ।
श्वासानिलास्ताः(श्) शतशो, निपेतुर्नभसोऽचलाः ॥ 27॥

**इति क्रोधसमाध्मात- मापतन्तं(म्) महासुरम् ।**
**दृष्ट्वा सा चण्डिका कोपं(न्), तद्वधाय तदाकरोत् ॥ 28॥**

**सा क्षिप्त्वा तस्य वै पाशं(न्), तं(म्) बबन्ध महासुरम् ।**
**तत्याज माहिषं(म्) रूपं(म्), सोऽपि बद्धो महामृधे ॥ 29॥**

**ततः(स्) सिं(म्)होऽभवत्सद्यो, यावत्तस्याम्बिका शिरः ।**
**छिनत्ति तावत्पुरुषः(ख्), खड्गपाणिरदृश्यत ॥ 30॥**

**तत एवाशु पुरुषं(न्), देवी चिच्छेद सायकैः ।**
**तं(ङ्) खड्गचर्मणा सार्धं(न्), ततः(स्) सोऽभून्महागजः ॥ 31॥**

**करेण च महासिं(म्)हं(न्), तं(ञ्) चकर्ष जगर्ज च ।**
**कर्षतस्तु करं(न्) देवी, खड्गेन निरकृन्तत ॥ 32॥**

**ततो महासुरो भूयो, माहिषं(वँ) वपुरास्थितः ।**
**तथैव क्षोभयामास, त्रैलोक्यं(म्) सचराचरम् ॥ 33॥**

**ततः(ख्) क्रुद्धा जगन्माता, चण्डिका पानमुत्तमम् ।**
**पपौ पुनः(फ्) पुनश्चैव, जहासारुणलोचना ॥ 34॥**

**ननर्द चासुरः(स्) सोऽपि, बलवीर्यमदोद्धतः ।**
**विषाणाभ्यां(ञ्) च चिक्षेप, चण्डिकां(म्) प्रति भूधरान् ॥ 35॥**

सा च तान् प्रहितां(म्)स्तेन, चूर्णयन्ती शरोत्करैः ।
उवाच तं(म्) मदोद्धूत- मुखरागाकुलाक्षरम् ॥ 36॥

देव्युवाच ॥ 37॥

गर्ज गर्ज क्षणं(म्) मूढ, मधु यावत्पिबाम्यहम् ।
मया त्वयि हतेऽत्रैव, गर्जिष्यन्त्याशु देवताः ॥ 38॥

ऋषिरुवाच ॥ 39॥

एवमुक्त्वा समुत्पत्य, सारूढा तं(म्) महासुरम् ।
पादेनाक्रम्य कण्ठे च, शूलेनैनमताडयत् ॥ 40॥

ततः(स्) सोऽपि पदाऽऽक्रान्तस्- तया निजमुखात्ततः ।
अर्धनिष्क्रान्त एवासीद्, देव्या वीर्येण सं(वृँ)वृतः ॥ 41॥

अर्धनिष्क्रान्त एवासौ, युध्यमानो महासुरः ।
तया महासिना देव्या, शिरश्छित्त्वा निपातितः ॥ 42॥

ततो हाहाकृतं(म्) सर्वं(न्), दैत्यसैन्यं(न्) ननाश तत् ।
प्रहर्षं(ञ्) च परं(ञ्) जग्मुः(स्), सकला देवतागणाः ॥ 43॥

तुष्टुवुस्तां(म्) सुरा देवीं(म्), सह दिव्यैर्महर्षिभिः ।
जगुर्गन्धर्वपतयो, ननृतुश्चाप्सरोगणाः ॥ 44॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुरवधो नाम तृतीयोऽध्यायः ॥

उवाच 3, अर्धश्लोकाः 41, श्लोकाः 44, एवमादितः 217

